3.6.6 Teachers participate in the live commentaries / lectures / discussion programmes/on the print and electronic media. Provide details.

वार्त्तापत्रेषु ई-गणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय/ धाराविवरणप्रसारणाय/ परिसंवादकार्यक्रमाय शिक्षका भागग्राहिणो भवन्ति, विवरणानि देयानि।

Answer: वार्तापत्रेषु वैद्युतिकगणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय धाराविवरणप्रदानाय परिसंवादकार्यक्रमाय च सम्पूर्णानंद संस्कृतविश्वविद्यालयस्य विभिन्नपरिसरीयाः शिक्षकाः मुख्यालयीयाधिकारिणः प्रशासकाश्च असकृत् भागं गृह्णन्ति। विश्वविद्यालयस्य केचन परिसराः पुण्यक्षेत्रेषु पुराणेतिहासप्रसिद्धेषु च प्रान्तेषु च सन्ति। अतः एतादृशक्षेत्रेषु कार्यक्रमाः अपि प्रचुरमात्रेण आयोज्यन्ते । तत्र अस्माकं परिसरीयाः प्राध्यापकाः प्रस्तुतीकर्तुं परिचर्चां कर्तुं च गच्छन्ति। प्रादेशिकासु वार्तापत्रिकासु अपि अस्माकं शिक्षकाणां सक्रियभागग्रहणं वर्तते एव। विशिष्य दूरदर्शनादिषु सर्वकारीयेषु माध्यमेषु

सक्रियसंवादकार्यक्रमेषु शिक्षकाणां भूमिकाम् अधिकृत्य अत्र क्रमशः प्रस्तुतीक्रियते।

1. भारतस्य साम्प्रतिकानां प्रधानमन्त्रिणां श्रीनरेन्द्र मोदि महाभागानां विशिष्टानि भाषणानि परिसंवादकार्यक्रमाः चर्चासत्राणि साक्षात्कारादयश्च प्रसारभारत्या आकाशवाण्यां दूरदर्शने च प्रसार्यन्ते। परम् अस्य अनुवादः प्रादेशिकभाषासु अपि जायते चेत् तर्हि ग्रामीणाः अपि सुखेन अवगन्तुं शक्नुवन्ति इति मत्वा प्रादेशिकभाषासु अनूद्य तेषां कार्यक्रमाणां प्रसारः क्रियते। तत्र जम्मूपरिसरीयाः आङ्ग्लभाषायाः वरिष्ठाचार्याः श्री शरच्चन्द्रशर्ममहोदयाः डोग्रि भाषायाम् प्रधानमन्त्रिणः भाषणानि चर्चादिकं अनुवदन्ति। एतादृशाः अनूदिताः कार्यक्रमाः ' चाय पे चर्चा ' मन की बात ' 'गरीब कल्याण के आठ साल ' इत्यादयः प्रसारभारतीपक्षतः प्रसार्यन्ते। गणराज्योत्सवे राष्ट्रम् उद्दिश्य राष्ट्रपतिना कृतस्य भाषणस्य अपि डोग्रि भाषायां लेखनम् अनुवादकथनम् इत्यादिकम् एतैः सम्पादितम्। 2. डा.शीबा एम.के. वर्या गुरुवायूरुपरिसरे अध्यापिका वर्तते। इयं महोदया आकाशवाण्याः सक्रियसंवादेषु भागं गृह्णाति। आकाशवाण्याम्

आङ्ग्लभाषायां स्त्रीपरव्याख्यानम् अकरोत् I 18/05/2017 तमे वर्षे अस्य प्रसारः जातः वर्तते। वेदान्तविभागीया डा. गायत्री देवी महोदया अपि वेदान्तशास्त्रीयं व्याख्यानम् आकाशवाण्याम् अकरोत्। 3. जयपुरपरिसरस्य सहायकाचार्यः डा. कुलदीपशर्मवर्यः 14/08/2018 तमे संवत्सरे प्रवृत्ते दूरदर्शनस्य राजस्थानीयमाध्यमे संस्कृतवाङ्मये राष्ट्रभक्तिः इति परिसंवादपरे कार्यक्रमे भागं गृहीत्वा वेदेषु उपनिषत्सु पुराणेषु काव्येषु नाटकेषु च निबद्धान् विचारान् सप्रमाणं सोदाहरणं च न्यरूपयत्। वयं राष्ट्रे जागृयाम इत्यादीन् वेदमन्त्रान् अपि सप्रसङ्गम् उदाहरत् । 4. सम्पूर्णानंद संस्कृतविश्वविद्यालयस्य कुलपतीनाम् आचार्याणां श्रीनिवासवरखेडिवर्याणां दूरदर्शने अन्येषु सक्रियसामाजिकमाध्यमेषु साक्षात्कार - संवाद- परिचर्चादिकं च नियतरूपेण प्रसारितं वर्तते। उत्कर्षमहोत्सवस्य प्रसारः बहुषु दूरदर्शनमाध्यमेषु सुसम्पन्नः । अस्मिन् महोत्सवे कुलाधिपतयः विभिन्नानां विश्वविद्यालयानां कुलपतयः शिक्षामन्त्रालयाधिकारिणः शिक्षकाः छात्राः च भागम् अगृहणन् । एतत् सर्वं समग्रे भारते प्रसारितम्

अस्ति। अस्य महोत्सवस्य प्रसारः तत्काले परिसरेषु अपि सम्पादितः वर्तते।एतद्विषयकं चर्चादिकं स्थानीयेषु दूरदर्शनेषु राष्ट्रियपत्रिकासु च सम्पन्नम् अस्ति। संस्कृतभाषायाः विश्वतोमुखत्वम् इति विषयकराष्ट्रियसङ्गोष्ठी अपि अस्मिन् सन्दर्भे संवृत्ता। अस्याः अपि प्रसारः दूरदर्शनेषु सम्पादितः वर्तते। 5. पुरीस्थाः सप्त सङ्ख्याकाः सदाशिवपरिसरस्य प्राध्यापकाः जगन्नाथस्य रथयात्रायाः विवरणं 2020-21 तमे संवत्सरे रथोत्सवसमये दूरदर्शनेषु च समपादयन् । तत्रत्यः डा. गणेश्वर प्रसाद मिश्रवर्यः ' दैनिक भास्कर ' इत्यस्यां पत्रिकायाम् असकृत् सामयिकं धार्मिकाध्यात्मिकविचारान् आश्रित्य ज्यौतिषशास्त्रीयदृशा च लिखन्ति। 6. भोपालपरिसरीयाः 2016 तमे संवत्सरे प्रवृत्तायाः सिंहस्थकुम्भमेलायाः चर्चासत्रे भागम् अगृह्णन् । एषः परिचर्चासम्बद्धः कार्यक्रमः मध्यप्रदेशस्य सर्वकारेण समायोजितः आसीत्। 7.डा.शैलेन्द्र उनियाल वर्यः 2021 तमे संवत्सरे दूरदर्शनेन आयोजिते आस्था का प्रतीक कुम्भ इति परिसंवादपरे कार्यक्रमे महाकुम्भस्य विषये संवादम् अकुर्वन्। एते उत्तराखण्डराज्यस्य रघुनाथकीर्तिपरिसरे वेदविभागस्य विभागाध्यक्षाः

सन्ति। 8. रघुनाथकीर्तिपरिसरस्य निदेशकानां आचार्याणां बनमाली बिश्वालवर्याणां साक्षात्कारः डा. अनिलकुमारमहोदयेन 2021 तमे संवत्सरे सम्पादितः । एषः सारस्वतः संवादः इति कार्यक्रमः रघुनाथवार्तावल्यां प्रकाशितः वर्तते। अत्र तेषां व्यक्तित्वस्य विद्याध्ययनपरम्परायाः शैक्षिकदृष्टेः प्राशासनिकदृष्टेः च विषये प्रश्नोत्तररूपेण सम्पन्नः संवादः उल्लिखितः वर्तते। 9. भोपालपरिसरीयाः प्राध्यापकाः क्रिकेट क्रीडाकूटस्य आयोजनावसरे क्रीडाम् अपि संस्कृतेन व्याख्यान्ति। अस्य प्रसारः दूरदर्शनेषु पत्रिकासु च सञ्जातः वर्तते। 10. जयपुरपरिसरस्य आचार्याः सुदेशकुमारशर्मावर्याः 04/04/22 तमे दिनाङ्के दूरदर्शनं राजस्थानम् इत्यत्र 'भारतीय नववर्ष के वैज्ञानिक महत्व' इति विषये प्रवृत्ते संवादकार्यक्रमे भागम् अगृह्णन् । ते पाश्चात्यानां पौरस्त्यानां संवत्सरस्य परिगणनायां कालगणनायां च परिदृश्यमानं साम्यं वैषम्यं च अधिकृत्य सविस्तरम् अब्रुवन्।

विविधवार्तापत्रेषु ई गणमाध्यमेषु च साक्षाद्विवरण प्रदानाय, धारावाहिक विवरण प्रकाशनाय, परिसंवाद कार्यक्रमाय अध्यापकाः भागग्राहिणो भवन्ति। तेषां विवरणानि प्रदेयानि :-

**(i) वार्तापत्र :-** अस्मात् विश्वविद्यालयात् गाण्डीव नामकं संस्कृतवार्तापत्रम् सञ्चालितः वर्तते। संस्कृतक्षेत्रे सर्वेऽपि आदरत्वेन इदम् गाण्डीवपत्रम् प्रसिद्धं वर्तते। अत्र बहूनां अध्यापकानां शोधपत्राणां प्रकाशनं भवति, वार्ताश्च भवन्ति।

**(ii)प्रत्यक्षविवरणप्रदानम् :-** अस्य विश्वविद्यालयस्य अनेके आचार्याः **'फेसबुक'** माध्यमेन, **'ई प्रूफ'** माध्यमेन धाराप्रवाहिक प्रसारणं कुर्वन्ति। यथा -

(1) प्रो. हरिप्रसाद अधिकारी महाभागः श्रीमद्भागवतस्य, श्रीमद्भगवद्गीतायाश्च प्रतिदिनं सायंकाले तत्त्वानाम् बोधनाय व्याख्यानं करोति। तस्मास् श्रोतॄणां मनसि शास्त्राणां कृते श्रद्धाभावः सुस्थिरो भवति।

(2) प्रो. रमेश प्रसाद अयम् आचार्यः बुद्धासिरीज कार्यक्रमं निर्माय अनेकान् बुद्धसम्बन्धिग्रन्थान् पाठयन्ति। यथा बौधिचर्यावतारः।